# Ribhuproktam Sarvanchinmatrevanirupanam

# ઋભુપ્રોક્તં સર્વચ્ચિન્માત્રેવનિરૂપણમ્

## Document Information

Text title : Ribhuproktam Sarvanchinmatrevanirupanam

File name : RRibhuproktaMsarvanchinmAtrevanirUpaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 16 | 24-63||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં સર્વઞ્ચિન્માત્રેવનિરૂપણમ્

(સર્વં ચિન્માત્રેવ હિ)

ચિન્માત્રજ્યોતિરાનન્દશ્ચિન્માત્રજ્યોતિવિગ્રહઃ ।
ચિન્માત્રજ્યોતિરીશાનઃ સર્વદાનન્દકેવલમ્ ॥ ૧૬.૨૪॥

ચિન્માત્રજ્યોતિરખિલં ચિન્માત્રજ્યોતિરસ્મ્યહમ્ ।
ચિન્માત્રં સર્વમેવાહં સર્વં ચિન્માત્રમેવ હિ ॥ ૧૬.૨૫॥

ચિન્માત્રમેવ ચિત્તં ચ ચિન્માત્રં મોક્ષ એવ ચ ।
ચિન્માત્રમેવ મનનં ચિન્માત્રં શ્રવણં તથા ॥ ૧૬.૨૬॥

ચિન્માત્રમહમેવાસ્મિ સર્વં ચિન્માત્રમેવ હિ ।
ચિન્માત્રં નિર્ગુણં બ્રહ્મ ચિન્માત્રં સગુણં પરમ્ ॥ ૧૬.૨૭॥

ચિન્માત્રમહમેવ ત્વં સર્વં ચિન્માત્રમેવ હિ ।
ચિન્માત્રમેવ હૃદયં ચિન્માત્રં ચિન્મયં સદા ॥ ૧૬.૨૮॥

ચિદેવ ત્વં ચિદેવાહં સર્વં ચિન્માત્રમેવ હિ ।
ચિન્માત્રમેવ શાન્તત્વં ચિન્માત્રં શાન્તિલક્ષણમ્ ॥ ૧૬.૨૯॥

ચિન્માત્રમેવ વિજ્ઞાનં ચિન્માત્રં બ્રહ્મ કેવલમ્ ।
ચિન્માત્રમેવ સઙ્કલ્પં ચિન્માત્રં ભુવનત્રયમ્ ॥ ૧૬.૩૦॥

ચિન્માત્રમેવ સર્વત્ર ચિન્માત્રં વ્યાપકો ગુરુઃ ।
ચિન્માત્રમેવ શુદ્ધત્વં ચિન્માત્રં બ્રહ્મ કેવલમ્ ॥ ૧૬.૩૧॥

ચિન્માત્રમેવ ચૈતન્યં ચિન્માત્રં ભાસ્કરાદિકમ્ ।
ચિન્માત્રમેવ સન્માત્રં ચિન્માત્રં જગદેવ હિ ॥ ૧૬.૩૨॥

ચિન્માત્રમેવ સત્કર્મ ચિન્માત્રં નિત્યમઙ્ગલમ્ ।
ચિન્માત્રમેવ હિ બ્રહ્મ ચિન્માત્રં હરિરેવ હિ ॥ ૧૬.૩૩॥

ચિન્માત્રમેવ મૌનાત્મા ચિન્માત્રં સિદ્ધિરેવ હિ ।

ચિન્માત્રમેવ જનિતં ચિન્માત્રં સુખમેવ હિ ॥ ૧૬.૩૪॥

ચિન્માત્રમેવ ગગનં ચિન્માત્રં પર્વતં જલમ્ ।
ચિન્માત્રમેવ નક્ષત્રં ચિન્માત્રં મેઘમેવ હિ ॥ ૧૬.૩૫॥

ચિદેવ દેવતાકારં ચિદેવ શિવપૂજનમ્ ।
ચિન્માત્રમેવ કાઠિન્યં ચિન્માત્રં શીતલં જલમ્ ॥ ૧૬.૩૬॥

ચિન્માત્રમેવ મન્તવ્યં ચિન્માત્રં દૃશ્યભાવનમ્ ।
ચિન્માત્રમેવ સકલં ચિન્માત્રં ભુવનં પિતા ॥ ૧૬.૩૭॥

ચિન્માત્રમેવ જનની ચિન્માત્રાન્નાસ્તિ કિઞ્ચન ।
ચિન્માત્રમેવ નયનં ચિન્માત્રં શ્રવણં સુખમ્ ॥ ૧૬.૩૮॥

ચિન્માત્રમેવ કરણં ચિન્માત્રં કાર્યમીશ્વરમ્ ।
ચિન્માત્રં ચિન્મયં સત્યં ચિન્માત્રં નાસ્તિ નાસ્તિ હિ ॥ ૧૬.૩૯॥

ચિન્માત્રમેવ વેદાન્તં ચિન્માત્રં બ્રહ્મ નિશ્ચયમ્ ।
ચિન્માત્રમેવ સદ્ભાવિ ચિન્માત્રં ભાતિ નિત્યશઃ ॥ ૧૬.૪૦॥

ચિદેવ જગદાકારં ચિદેવ પરમં પદમ્ ।
ચિદેવ હિ ચિદાકારં ચિદેવ હિ ચિદવ્યયઃ ॥ ૧૬.૪૧॥

ચિદેવ હિ શિવાકારં ચિદેવ હિ શિવવિગ્રહઃ ।
ચિદાકારમિદં સર્વં ચિદાકારં સુખાસુખમ્ ॥ ૧૬.૪૨॥

ચિદેવ હિ જડાકારં ચિદેવ હિ નિરન્તરમ્ ।
ચિદેવકલનાકારં જીવાકારં ચિદેવ હિ ॥ ૧૬.૪૩॥

ચિદેવ દેવતાકારં ચિદેવ શિવપૂજનમ્ ।
ચિદેવ ત્વં ચિદેવાહં સર્વં ચિન્માત્રમેવ હિ ॥ ૧૬.૪૪॥

ચિદેવ પરમાકારં ચિદેવ હિ નિરામયમ્ ।
ચિન્માત્રમેવ સતતં ચિન્માત્રં હિ પરાયણમ્ ॥ ૧૬.૪૫॥

ચિન્માત્રમેવ વૈરાગ્યં ચિન્માત્રં નિર્ગુણં સદા ।
ચિન્માત્રમેવ સઞ્ચારં ચિન્માત્રં મન્ત્રતન્ત્રકમ્ ॥ ૧૬.૪૬॥

ચિદાકારમિદં વિશ્વં ચિદાકારં જગત્ત્રયમ્ ।
ચિદાકારમહઙ્કારં ચિદાકારં પરાત્પરમ્ ॥ ૧૬.૪૭॥

ચિદાકારમિદં ભેદં ચિદાકારં તૃણાદિકમ્ ।
ચિદાકારં ચિદાકાશં ચિદાકારમરૂપકમ્ ॥ ૧૬.૪૮॥

ચિદાકારં મહાનન્દં ચિદાકારં સુખાત્સુખમ્ ।
ચિદાકારં સુખં ભોજ્યં ચિદાકારં પરં ગુરુમ્ ॥ ૧૬.૪૯॥

ચિદાકારમિદં વિશ્વં ચિદાકારમિદં પુમાન્ ।
ચિદાકારમજં શાન્તં ચિદાકારમનામયમ્ ॥ ૧૬.૫૦॥

ચિદાકારં પરાતીતં ચિદાકારં ચિદેવ હિ ।
ચિદાકારં ચિદાકાશં ચિદાકાશં શિવાયતે ॥ ૧૬.૫૧॥

ચિદાકારં સદા ચિત્તં ચિદાકારં સદાઽમૃતમ્ ।
ચિદાકારં ચિદાકાશં તદા સર્વાન્તરાન્તરમ્ ॥ ૧૬.૫૨॥

ચિદાકારમિદં પૂર્ણં ચિદાકારમિદં પ્રિયમ્ ।
ચિદાકારમિદં સર્વં ચિદાકારમહં સદા ॥ ૧૬.૫૩॥

ચિદાકારમિદં સ્થાનં ચિદાકારં હૃદમ્બરમ્ ।
ચિદાબોધં ચિદાકારં ચિદાકાશં તતં સદા ॥ ૧૬.૫૪॥

ચિદાકારં સદા પૂર્ણં ચિદાકારં મહત્ફલમ્ ।
ચિદાકારં પરં તત્ત્વં ચિદાકારં પરં ભવાન્ ॥ ૧૬.૫૫॥

ચિદાકારં સદામોદં ચિદાકારં સદા મૃતમ્ ।
ચિદાકારં પરં બ્રહ્મ ચિદહં ચિદહં સદા ॥ ૧૬.૫૬॥

ચિદહં ચિદહં ચિત્તં ચિત્તં સ્વસ્ય ન સંશયઃ ।
ચિદેવ જગદાકારં ચિદેવ શિવશઙ્કરઃ ॥ ૧૬.૫૭॥

ચિદેવ ગગનાકારં ચિદેવ ગણનાયકમ્ ।
ચિદેવ ભુવનાકારં ચિદેવ ભવભાવનમ્ ॥ ૧૬.૫૮॥

ચિદેવ હૃદયાકારં ચિદેવ હૃદયેશ્વરઃ ।
ચિદેવ અમૃતાકારં ચિદેવ ચલનાસ્પદમ્ ॥ ૧૬.૫૯॥

ચિદેવાહં ચિદેવાહં ચિન્મયં ચિન્મયં સદા ।
ચિદેવ સત્યવિશ્વાસં ચિદેવ બ્રહ્મભાવનમ્ ॥ ૧૬.૬૦॥

ચિદેવ પરમં દેવં ચિદેવ હૃદયાલયમ્ ।
ચિદેવ સકલાકારં ચિદેવ જનમણ્ડલમ્ ॥ ૧૬.૬૧॥

ચિદેવ સર્વમાનન્દં ચિદેવ પ્રિયભાષણમ્ ।
ચિદેવ ત્વં ચિદેવાહં સર્વં ચિન્માત્રમેવ હિ ॥ ૧૬.૬૨॥

ચિદેવ પરમં ધ્યાનં ચિદેવ પરમર્હણમ્ ।
ચિદેવ ત્વં ચિદેવાહં સર્વં ચિન્મયમેવ હિ ॥ ૧૬.૬૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં સર્વમસદેવનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૧૬ । ૨૪-૬૩॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 16 . 24-63..

Notes :

Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita. Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

---

*Ribhuproktam Sarvanchinmatrevanirupanam*

pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*